भुवनदीपक

१८०

Acc. No. ~~1766~~ M-1579
Title - भुवनदीपक
Author - ?
Date - ?
Subject - ज्योतिष
folio - 13
Xerox - 25

१

श्रीगणेशाय नमः ॥ प्रणम्य विघ्नहर्त्तारं विघ्नराजेन लिख्यते ॥ टीका भुवनदीपस्य सांवत्सरसु
खप्रदा ॥ १ ॥ गर्भस्य क्षेमोऽस्ति न वा १४ । गुर्विण्याः प्रसवकालः १५ युगलवालकाजन्मादिज्ञानं
१६ ॥ गर्भस्थमाससंख्या ॥ १७ धनाविविवाहिता भार्या १८ विषकन्यास्वरूपं १९ भावांतर्गत
ग्रहस्य स्वरूपं २० । विवाहादिविचारणा ॥ २१ । विवादस्य वर्त्मत्यता २२ संकीर्णपदनिर्णयः २३ ।
धातुवादादिदीप्तपृच्छा ॥ २४ पथिकस्यागमागमौ २५ मृत्युयोगः २६ दुर्गभंगः २७ । चौर्यादि
स्थानपंचकं २८ समर्घमहर्घस्वरूपं ॥ २९ नौकुलतारणादि ॥ ३० अतीतदिनेषु लाभालाभ
विचारः ३१ लग्नपतेः सकाशान् कदा लाभः कस्मिन्मासे वा ३२ ड्रेष्काणादिफलं ३३ अद्भु
तदोषज्ञानं ३४ । गजादीनां कदा किं भविष्यति ॥ ३५ ॥ अस्मिन्गर्भे किं पुत्रः पुत्री वा ३६ ॥ अ
थ ग्रहाधिपाः प्रथमप्रकारमाह ॥ मेषवृश्चिकयोः स्वामी भौमः । एवं सर्वत्र ॥ १२ ॥ अथोच्चनीचेद्वि
तीयप्रकारमाह ॥ रवेः सूर्यस्य मेषः उच्चं । तुला नीचं सप्तमत्वात् । एवं सर्वत्र ॥ १४ ॥ अथ मित्रशत्रुत्व

म

१

यद्वा रमा हा एते चत्वारिः स्वस्मिन्विषये मित्राणि संति अविरोधित्वात्॥ अमीषां चतुर्णां मध्ये यदि यं चमः
कोपि मिलति शत्रुरेव परदलत्वात्॥ यथा रवेश्चंद्र भौमगुरवो मित्राणि। चंद्रस्य सूर्यमंगलगुरवो मि
त्राणि॥ भौमबृहस्पत्योरप्येवं ज्ञेयं॥ तथा शुक्रशनि राहव इति शाश्वत्॥ तथा हि बुधस्य शुक्रराह
वो मित्राणि॥ इत्यादि ज्ञेयं॥ अति मैत्री राहुशन्यो रिंदुगुर्वोः कुजार्कयोः॥ सितज्ञयोर्दशायां त्यस्व
त्रिबंधुषु न लक्षणं॥ राहुरव्योः परं वैरं गुरुभार्गवयोरपि॥ हिमांशुबुधयोर्वैरं विवस्वन्मंदयोरपि॥ वि
वस्वतः सूर्यस्य मंदेन शनिना वैरं॥ शनी सुहृदौ भस्यं कुजेंदु [illegible] रवयः सदा॥ पूज्यवर्गे गुरुसितौ
सेंहिकेयस्य कथ्यते॥ १५॥ अथ राहूच्चनीचानि॥ बुधस्य यत्स्वकीयमुच्चं [illegible] कन्यालक्षणं तद्राहोः
सामान्यं गृह्यते। बुधस्य यत्सामान्यं मिथुनाख्यं तद्राहोरुच्चमिति बुधा बुवते कथयंति॥ तदुक्तं
कन्या राहुगृहं प्रोक्तं राहूच्चं मिथुनं विदुः॥ राहोर्नीचं धनुर्वर्णादिकं शनि वदस्य च॥ राहोः स्वभावमा
हुराहुर्दुष्टः परं किंचिद्दुदास्ते मिश्रसञ्ज्ञानि॥ कन्यामिथुनयोः किंचिद्विधत्ते शुभमव्ययं॥ यद्यपि रा

3

२

कुः परं दुष्टः क्रूरस्यात्॥ तथा कन्यायां मिथुने वा वर्त्तमानः॥ किंचिच्छुभं तथापि मित्रगृहे वर्त्तमानः उदा
सीनो भवति॥ तथा कन्यायां मिथुने वा वर्त्तमानः किंचिच्छुभमपि विधत्ते॥ अथ केतुर्यत्रावतिष्ठतीति॥
केतुः राहुच्छाया एव स्मृतः अयं राहुः यत्र राशौ भवति तद्राशेः सप्तमे राशौ केतुः स्यात्॥ यत्पुनः
राहुर्यत्र यस्मिन्नंशे भवति तस्माद्देशात् सप्तमेंशे केतुर्भवति॥ केतुरंशानवांशाकं एव कर्त्तव्यः अस्या
पि वर्गादिकं शनिवदेव स्यात्॥१८॥ अथ ग्रहस्वरूपं भार्गवेंदू स्त्री स्यात् [illegible] गतं स्थानं विज्ञानं प्र
मातमिंदुजस्त्री स्यात् नष्टं वस्तु कुत्रास्तीति प्रश्ने यो ग्रहो लग्ने भवति वा लग्नं पश्यति तदृष्ट्यनु
सारेण गतवस्तुस्थानं वाच्यं॥ अथ गमागमस्वरूपं जीवस्य ज्ञेयं॥ तथा बुधसितौ तिर्यक् दृशौ भौ
मार्कौ ऊर्ध्व दृशौ॥ जीवेंदू सम दृष्टी मनुष्यत्वे॥ शनिराहू अधो दृशौ नरकत्वे॥ अथ पाण्यावायत्रं॥
ग्रहाणां दृष्टिस्वरूपं शास्त्रां नरादाह॥ त्रिदशत्रिकोणचतुरस्र सप्तमानवलोकयंति चरणाभिवृ
द्धितः॥ रविजामरेड्यरुधिराः परे च ये क्रमशो भवंति किल वीक्षणाधिकाः॥ यस्मिंस्थाने ग्र

वस्तु

२

हः स्थितस्तस्मात्रि दशादीनि ॥ शुक्रार्कौ प्राङ्मुखौ ज्ञेयौ गुरुसौम्यावुदङ्मुखौ ॥ शनिसोमौ प्रतीच्यां च शेषा दक्षि
णामुखाः ॥ पिनमित्तिरोगिणः एछायां लग्नवारो गस्वरूपं वाच्यं ॥ २२ ॥ कुजो कटिरित्यस्माज्ज्ञाविभूतमोऽनस्वरू
पं वाच्यं ॥ बुधस्तुवरः कषायः शुक्र आम्लः शनिश्चंड्रराहुभौमाः चतुर्णां मध्ये यद्यकोपि लग्ने भवति ॥ लग्नं
वा पश्यन्ति तदा धातुश्चिंतां वदेत् ॥ पृछकस्येति शेषः सूर्यशुक्रौ लग्नवर्त्तमानौ पश्यन्तौ वा मूलचिंतां वदेत् ॥
वृहस्पतिबुधौ लग्नवर्त्तमानौ पश्यन्तौ वा जीवचिंतां वदेत् ॥ इत्यस्माद्धातुमूलजीवपरिज्ञानं ॥ जीवपरि
ज्ञानं द्विपाद चतुःपद बहुपदम पदं वाच्यं ॥ बहुपदश्चंद्रः राहुस्त्वपदः विशिविनि ज्ञाति परिज्ञानं पृछायां
जन्मकुंडलिकायां वा ज्ञेयं ॥ स्थूल इत्यस्मात् सर्ववस्तुस्वरूपं ज्ञेयं ॥ खंडः वा खंडाकारवस्तुदर्शी ॥ २७ ॥
रक्तवर्ण इत्यस्मात् सर्वस्यापि वस्तुनः पुरुषस्य वा वर्णपरिज्ञानं ॥ धिषणो वृहस्पतिः कनकद्युतिः सुव
र्णकांतिः बुधः शुकपिछसदृशः नीलकांतिः अनुस्मगुश्चंद्रः अर्कपुष्पमंदारपुष्पसदृशकांतिर्व
ह्निः श्वेतः अंतरीक्षात्यात् कविः शुक्रः अत्यंतधवलः अत्यंतश्वेतः शनिराहू कृष्णौ अवनी
श इत्यस्मात् जन्मलग्ने पृछायां च इत्यादि सूचयस्याक्षु जातिमध्ये आधिपत्यं वाच्यं ॥ नीचैः शत्रुक्षेत्र

२

स्थैः सौम्यैः सहितेविनष्टेनिच लपदवीमात्रं वाच्यं ॥ पुनः धातुचिंताविशेषमाह ॥ शुक्रे चंद्रे वा लग्नस्थिते पश्यति वा रौप्यं वाच्यं कथनीयं ॥ त्रपुसीसकं ज्ञेयं ॥ एवं धातोर्निश्चये ज्ञाते सति अस्मात्प्रकारादन्यो विशेषः वक्ष्यमाणः प्रकारः उदाहृतः कथितः ॥ २३ ॥ तदेव विशेषस्थानं अमी भिक्षुकादिग्रहैः लग्नाद्धिबुकस्थाने चतुर्थस्थाने युक्ते सति नष्टवस्तुनः भूमिस्थानं विलोकयेत् ॥ यद्यप्येते च चतुर्थस्थाने न संति तथाप्येतेमंशकाद्दृष्ट्या यथोक्तस्थानविज्ञानं भवति ॥ जन्मप्रच्छायां चौरगर्भसत्रांतप्रच्छासु पुरुषस्त्रीपरिज्ञानं अर्कः राहुः बुधइत्यस्मात्सर्वप्रच्छासु स्त्रीपुरुषाणां वयोवस्था वाच्या ॥ अत्र प्रश्नाच्चतुर्थस्थानाधिपतिर्विचारणीयः ॥ ततश्चोरवयो वाच्यमित्यर्थः ॥ वर्णादीन्याह्निकं प्राग्युक्त्या ज्ञेयं ॥ पक्षक्षीस्वभावेन दुःखदाः क्रूरत्वात् ॥ सुखकराः सौम्यत्वात् ॥ चतुर्दश्यादिदिनत्रये सर्वथा क्षीणश्चंद्रः क्रूरयुक्तः सौम्योपि क्रूरएव तज्ज्ञेयः ॥ २४ ॥ अथ द्वादशगृहेषु कुत्र किं विलोकनीयमिति ॥ रूपं सुंदरादिलक्षणमंशकादि वर्णो ब्राह्मणादि २

क्लेशः दुःखं राजमार्गादिकृतं। रोगो जीवितमरणादिदोषः॥ पृच्छकस्य शरीरसुखं योषिदादिभं
वं आयुर्जीवितं वयस्तारुण्यादिप्रमाणं जातिः प्रतीता॥ एतद्रूपादिकं लग्नपतितो ज्ञेयं॥ पृच्छायां
जन्मनि च कयोगात्सुखनिर्णयः कार्यः॥ तिथिलग्नाधिपतौ यत्र कुत्रापि स्थाने वलावलयोगा
द्दीर्घायुरल्पायुर्वा जन्मतो वाच्यं॥ धातूनां लोहादीनां कंदंबकं समूहः जन्मनि पृच्छायां च लग्नेश
धनेशौ भवतः॥ तदा बहुद्रव्यभांडारः॥ लग्नेशधनेशचंद्रास्तेकस्मिं धने न भवति॥ तस्य महाद्रव्यभां
डारः॥ यदा धने सौम्यग्रहो भवति॥ तदा पृच्छकस्य पृच्छार्थसिद्धिः॥ धनस्थाना द्वार्त्तानिर्णयः॥ धन
स्थाने शुभग्रहो यादृशी वार्त्ता तादृशी सिद्धिः॥ धनेशो वा शुभस्थाने वलीयस्तदापि वार्त्ता सत्या॥
जन्मनि वंशेलग्नपतिर्वा पियदि केंद्रे शुभान्वितः॥ किं वदंती तदा सत्या स्यादसत्या विपर्यया तां॥
यस्य धने राहुः स कदाचिन्न मिष्टान्नभोजी रोगी संतापी च॥ शुभग्रहयोगे बहुधनी मिश्रयोगे
मिश्रफलं॥ २॥ भगिनीति॥ एतेषां भ्रातृभृत्यादीनां फलादिकं॥ तृतीयाधिपतितो ज्ञेयं॥ क
र्मक्तो मासवर्षादिस्थापिताः॥ वाटिका पुष्पवनं॥ खलकं धान्याकुट्टनगाहनस्थानं॥ क्षेत्रे

४

यं शिक्षादिः प्रबंधो नवीशो नेत्रा कथारूपं सौरभी महिषी। रिपुसंग्रामसाधनकार्यं गवोक्षगोवृषी
न्मातुलाश्रश्नः आतंकस्य भयस्य शंकायह्वा। आतंकः परेभ्तभयं शंका सुहृद्दुष्टा॥ मातुलेत्यत्रैव
न्यायथ्यां॥ लग्नमाला भ्रातृभगिनी तृतीयभवनं तुर्यमातृगृहं पंचमं सुतभवनं षष्ठं मातुलेयं
भ्रातृभवनात्तृतीयं मातृभ्रातृतया प्रसिद्धमेव सप्तमं जायाभवनं॥ ६॥ वाणिज्यमिति॥ वाणिज्यं
क्रयविक्रयादिव्यवहारः परेषां द्वयार्पणं। यदि लग्नपो जायास्थाने तदा पुरुषोद्देशकारी। यदा लग्नेशो
लग्ने जायापतिर्जायास्थाने तदा यदा लग्नपो जायास्थाने जायापतिर्लग्ने तदा द्वयोरप्यादेशका
रित्वेन प्रीतिः स्वतंत्रेण द्वयोरपि यदा जायेशो जायं वीक्षते तदा परस्परं प्रीतिः लग्नपो जायास्था
नं पश्यति। तदा न प्रीतिः यदा जायास्थाने उच्चं भवति तदा पुरुषात् क्रियाद्व्ययगुणे स्त्री उच्चा भवति॥
जायास्थाने स्वानुगृहाधिष्ठिते धृता भार्याय दि जायापतिः ग्रहांतरेण मित्रेण युतो भवति
तदा स्त्रिय उपपतियोगो वाच्यः॥ मित्रेणचिनापि नाशो द्विग्रहयोगो भवति तदपि उपपतियो

५१ ४

8

योगः॥ यदि जायेशः स्वस्थो भवति वीर्य्यवान् तस्मादधिका त्समराधिका स्त्री समर्था॥ यद्य स्त्री जातके लग्न
पतेोग्रहान्तरमित्रयुक्तः स्त्रियउपपतियोगोवाच्यः॥ लग्नपतिः स्वस्थ उच्चं पश्यति तदा स्त्री स्वै
रिणी भवति॥ सप्तमयनीनी चे भृगले नीचे स्वैरिणी निशुका च भवति॥ सप्तमे अष्टमे च मंग
ले वैधव्यं। कलत्रादिकार्यं सर्वं कलत्रतः सप्तमभवनात् पश्येत्॥७॥ छिद्रेत्यादि॥ छिद्रश
किन्याष्टिगृहीते छिद्रमष्टमं स्थानं दं स्थानं शोयोग्रहरहितं। विशेषतः चंद्ररहितं श्रेयः प
रमागमनप्रच्छायामत्र चंद्रः श्रेयान्। व्ययस्थानेषु॥१२॥ अथाभीष्टस्य कालस्य निर्णयः॥
मकरादिषड्राशिषु कर्कादिसंक्रान्तिषट्के १३५ ध्रुवांकाः भौमो माघ्यैनच्छायापादानां मध्या
दकं प्रथमं पादं १४४ त्याज्यते घटिकां च आद्यदले अपरदले तत्पादं घटिकां च गृह्यते पू
र्वाह्ने संज्ञातदिनमानं। अपराह्ने विशेषं वदेत्। बुधा इति शाहुः पादो मृगादिषट्के कर्का
दिषट्के च ध्रुवांकेषु भागं स्यात्। ध्रुवांकाः १४४। १३५।॥१५४॥ अथ लग्नविचारः सर्वेषु
भावेषु अतीतानागतवर्तमानेषु चंद्रमा वीजतुल्यः इति कोर्थः यस्मिंस्थाने भवति तत्र वि

५

चारणीयः॥यस्य लग्नं वा वीजं या वयतो विशोपकालग्नं पश्यति चंद्रस्तु १ यद्विशोपकालग्न
मितिभावः। लग्नं तु कुसुमतुल्यं यादृशं लग्नं स्वामियुतं दृष्टं वा तादृशं कार्यफुलस्य युष्ट
मित्यर्थः॥यथा यादृशो लग्नं नवांशकस्तादृशं तत्तुल्यं फुलं विचार्यमित्यर्थः॥लग्नस्य
यादृशो भावः क्रूराः क्रूरास्थिरास्तो दिताः स्तत्रादृशाः स्यादुरिति॥ग्रहकलगवलं वादृ
शो वेश्मसु चंद्रबलाद्बलं ज्ञेयं यवस्य लग्नस्य उदयो भवति भविष्यति भावस्वरूपमुद्दि
तं वर्त्तमानं। भाविभविष्यं भूतमतीतं कार्याधिपतिना सह लग्नाधिपतेः कदा संयो
गा भवति तदा कार्यसिद्धिः॥चकारात्समदृष्टिः कार्यस्थाने कार्याधिपतिः लग्ने लग्नाधि
पतिर्भवति॥तदा कार्यं ज्ञेयं। १६॥उदितस्थे त्यादि॥आदौ उदितस्य तत्रस्थस्य च पुनः
भावस्य कार्याधिपतिः उदितो स्तौ नि च उच्चोवेति। विचारणीयः यदि लग्नकोपि न भव
ति तदा नदनुपश्चात् नाथः लग्नपतिः यस्मिन्भाव स्थाने स्थितः तत्स्थानं विचा=

५

श्रः

र्यभावः लग्नभावः लग्नपतिदर्शने सति शुभग्रहौ द्वौ त्रयो वा लग्नं पश्यंति यदि तदानीमाहुर्यागं त्रिभागे
नं क्रूरवीक्षणवर्ज्यश्चत्वारः सौम्यखेचरा लग्नं लग्नेंदर्शने सति पश्यंति पूर्णयोगकराः॥ अथ का
र्यरूपः कार्यभावः तस्य नाथा स्थानाधिपतिः लग्नाधिपतिश्च वीक्षणायोगो परस्परं मिलितो भाव
धि ष्ठितारौ लग्नकार्ययोः स्थितौ भवतः तदा कार्यसिद्धिः द्वयोरेव दृष्टिसद्भावेपि यदि चंद्रदृष्टिः
पूर्णा त्रिभिर्भागैः सप्तदशविशेषका कार्यसिद्धिः॥ २०॥ ग्रहाविनष्टाया दक्रूस्याः दिति दशम
द्वारमाह॥ संग्रहश्चतुः प्रकारैर्विनष्टः स्मृतः दृष्टांतमाह॥ यः क्रूरेणाजीयमानः आच्छादितः स
क्रूरगतो विज्ञेयः यस्मिन्नंशे ग्रहो भवति तस्मिन्नंशे राशिभागे यदि क्रूरो भवति तदा क्रूरयुतो भ
वति विपर्यये अपि नष्टः एवं धनादिस्थानेष्वपि॥ यस्य यस्याधिपतौ विनष्टे सति तस्य तस्य का
र्यस्य हानिरिति॥ २१॥ अथ राजयोगचतुष्टयमिति। एकादशद्वारमाह॥ चतुर्थेषु राजप्रयोगे
षु उभयत्र लग्नकार्ययोश्चंद्रदृष्टिपरस्परं दर्शनं उभयो रुभयोर्यदि मैत्री भवति॥ तदाधित
रं शुभं ज्ञेयं चंद्रो न पश्यति अन्यः कोपि सौम्यो लग्नं दा कार्यं वा पश्यति तदा वक्रयंप्रारब्ध

11

६

न१

स्य कार्यस्य सिद्धिमध्ये अन्यत्र किंचिच्छुभं नवं प्रयोजनं भवतीति वाच्यं॥ अथ पंचमः॥
राजयोगफलं विस्तारोमतेमतः कथितः॥२३॥ अथ लाभादीनां विचारं तिद्वादश द्वार
माह॥ लग्नाधिपो ग्राहकः लाभाधीशो दाता योगो दृष्टियोगाभ्यां लाभकरो भवति॥ परं
लाभकरस्तु देवयादि तस्य लग्नाधिपस्य द्रव्यलाभो भवति॥ चंद्रोपि तात एव दृष्टिं च योग
स्य फलाभवंति॥ तस्यैव भाले दृष्टिर्यदा स्यात् तदा भवत्याशु कार्यस्य सिद्धिः॥२५॥ द
शमनवमसप्तमाष्टपतीनां चलग्राधीशस्य योगो भवति॥ वश्यमाण श्लोकफ
लं वक्तव्यं तत्तत्स्थानेक्षणानइति॥ तेषां तेषां पुण्याधीशादिस्थानाधिपतीनां तत्र
ईक्षणतः विलोकनात्॥ तदनुसारेण तादृशं तादृशं फलं वक्तव्यं परं विलग्नकार्या
दिभावा एवमेव विचारणीयाः॥ अथ लग्नेशाद्यस्थितेः फलमिति त्रयोदशद्वारं॥
२८॥ अथ गर्भस्य क्षेमक्षेमे तस्येति चतुर्दशद्वारं [illegible]ह॥ इति गर्भाधिपः पंचमस्थानस्वा

मा

६

गर्भ॰ पंचम॰

र्भौ पंचमं स्थानं पश्यति क्रूरो ग्रहः पश्यति । अथवा पंचमस्थाने क्रूरो ग्रहो भवति । तदा अस्य गर्भस्य च्युतिः पतनं भविष्यतीति वाच्यं ॥ चंद्रो लग्नपतिर्वापि यदि केंद्रशुभान्वितः ॥ किंवदंती तदा सत्या स्यादसत्या विपर्यये ॥ लग्नस्थं चंद्रं जं चेद्दृः क्रूरो वाथ यदि पश्यति ॥ धनलाभो भवत्याशु किं स्वनेर्था पि प्रष्टतः पश्चात् ॥ ४० ॥ अथ गुर्विण्याः प्रसवो यदेति । यदि गर्भाधिपः क्रूराक्रांतो द्यभावेन अ विनष्टः सन् गर्भं पश्यति तस्मिन्नेव समये प्रत्यासन्नं त्यानकाले प्रसवो वाच्यः ॥ अन्यथा नेति ॥ पंचमस्थाने शुक्रदृष्टिं विना न फलति ॥ तत्त्वपदा लग्नपतेः पितृस्थानाधिपतिः नात्र संयोगः पि तुश्च विनष्टो मातृस्थानव्यभिचारो सर्वोत्तमे अन्यज्जातोयमिति वाच्यं ॥ अथापत्ययुग्मप्रसवश्च गुणाधिग्रहयुग्मेषु तत्स्थानेस्थाने संपूर्णदृष्ट्या दृष्टेन युग्मस्य प्रसवो वाच्यः ॥ अथ ये मासा गर्भ संभवा इति दशमैकादशद्वादशस्थानेषु शुक्रस्तदा पंचमस्थानतो गणनीयः ॥ तावंतो मासा सौम्यग्रहेणासंयुक्ते मासकल्ये वाच्याः ॥ अथ घताविवाहितो भार्या इत्यस्य द्वादश द्वारमाह ॥ सौम्यग्रहेणासंयुक्ते सप्तमस्थाने सौम्यतां प्राप्ते सौ स्याद् दृष्टे हि वुकस्थाने घताऊढतावाच्यः ॥ ४५ ॥ उभयो श्चतुर्थे सप्तमस्थाने सौम्यतां प्राप्ते सौ

यदि २

13

मग्रहो सकलदृष्ट्या वा न दा द्दृष्टे ते विवाहिते भार्ये स्तः ॥ एकाधलाए का विवाहिता यदि इभे
चतुर्थे सप्तमे क्रूरतां प्राप्ते इति योगे कथमपि द्वे भार्ये भवतः । तथापि ते खसुखाय नः । किं तु प
श्चात् शेषकाले सुखदायके ति वाच्यं ॥ ४६ ॥ अथ विषकन्या यथा भूवुदिति । लग्ने यस्मात्
दृष्टा लग्न कुंडलिकायामेनन न्नस्तेयं ॥ तदुक्तं लग्ने सौरी रविः प्रांते धर्मस्थे धरणीसुते ॥ अ
त्र लग्ने युदायाता भवे स्त्री विषकन्यका ॥ क्रूरद्वयमध्यगाते लग्ने वेइ च कन्यका जाता ॥ तनुहंगि
यं रपक्षे स्वसुरकुलं घातयत्यखिलं ॥ ४७ ॥ अथ भावांतगो ग्रहो याद्दृमित्तिर्ो । मूर्तेधः खेगे जामि
त्रे न दाधाति ये न हंति कलत्रं क्रूरा स्वान्ये निधनं च ने न तदा कदा के ॥ उ इति व्यत्तिर्न स्यात् तथा बहुकाले
न जनयन्ति व लवानग्रपलंतु ॥ अथ विवाहादि विचारेण एकविंशति द्वारमाह ॥ स्वं वरगतं दश
मस्थानं । ऊर्ध्वः ऊर्ध्वदृष्टिमनेन शनि राहुतु वा घोदृशा वि त्ति यन कारणे न मूर्तौ लग्ने वर्तमानः
ऊर्ध्वः क्रूरग्रहः यामित्रे सप्तमस्थाने दर्शनं न दधाति । न पश्यति तेन कारणेन कलत्रं न हंति स्त्री
विनाशनं कुरुते अन्ये तु ऊर्ध्ववर्जिताः क्रूरा घ्नंति ॥ अथ वर्तन्ययना विवाहस्य ति विवाहे एष्टाः

सुयदि क्रूरो ग्रहः लग्ने भवति तदा पर्यायस्यास्य शत्रुमित्रादिबलरहितासु विवदानं विवादं कुर्वाणां परं
शत्रुं जयति। यदि भुए व लग्नस्थः क्रूरग्रहः नीचः अस्तंगतो भवति तदा द्विषं तं शत्रुं न जयति। लग्नं प
छकसप्तमः शत्रुलग्ने तथा सूर्ये यदा क्रूरग्रहो भवति॥ तदा विवादिनोर्द्वयोः काले कलहनिवृत्तिर्न स्यात्॥
बहुकालं विवादो भवतीत्यर्थः॥ बलवान विगतबलं न जायन्ति तु पुनः तयोर्मध्ये यदा गुरुः सबलो
भवति। तस्य या प्रतियादिनास्य यो भवतीति वाच्यं॥ ५०॥ रंध्रे लग्नाधिपतिर्भक्तिकार्थं गतदैवयदि
तस्मात् ता। श्रेयात्यथा मित्रेतास्मिन् काले तदा सिद्धिः॥ लग्नं सप्तमे परित्यज्यान्यत्र वर्त्तमानो क्रूरग्र
हो यदि क्रूरया परस्परं पूर्णदृष्टो स्यात् तदैव विवादियुगं यादियुगे वा द्वियुगलं कर्त्तृ छुरिकापायाय
मदंष्ट्रारूपाभ्यां विवदानं विवादं कुर्वाणं प्रहरति प्रतारं करोति॥ अथ संकीर्णपदानि आह॥ अत
दानंदीसालीयदा गयाणं पदाभिषेकः प्रतिमास्थापने प्रतिष्ठा। एतेषां कार्याणां विच्छिद्र इति कर्तव्य
तासु ग्रारभ्य गुरुणा कार्यक श्रीदुपदेशकेन वा दशमं कर्मस्थानं पृच्छालग्ने प्रति लग्ने च गक्ष

योगमध्यात्॥ रविहरिसप्रतिमि: सर्वग्रहः क्लिोकृनैर्वलवद्दलाधिकं कर्तव्यम्॥ दशमस्थानेवलवतिका
र्यंकर्तव्यं नान्यथेतिभावः॥ नवादेवप्रतिष्ठायांगुरुवलं॥ स्नानस्थापनप्रतिष्ठायां बुधवलं पुरनग
रग्रामदेवदेवदेवीदेवादिस्थापनायां शुक्रवलं द्यूतवधदुर्गभंगविषमकार्येषु राहुबलं॥ स
र्वत्रचंद्रवलं कार्यंस्लसपसेताराबलंचयदिलग्नाधिपतिः रंध्रेष्टमस्थानेभवतितदारंध्रकार्यं
नभवतियदिनस्मादष्टमस्थानात शत्रुक्षेत्रेब्रजतितदेवकार्यभंगंकरोति॥ अथयदिएवल
ग्नपतिः अष्टमस्थानान्मित्रक्षेत्रेयातितदा तस्मिन्काले तस्यकार्यस्यसिद्धिर्भवति॥ प्रश्नः
काले लग्नेषष्ठेष्टमे वावर्तमानश्चंद्रः क्रूरवीक्षायुग्मं कष्टमावेशुस्माति॥ किंतुमतमतिक
गेतिवीक्षाचयल्कुताभ्यां सर्वष्ठाम्रुलग्नाषडष्टमसुश्रावक्षिवि चंद्रःशुभएवक्ंपुनःक्रूरै
र्युक्तः दृष्टश्च अथानिश्चयोदीमृत्युर्भवति॥२४॥ कश्चिन्नरोदेशांतरगतो आयातिनआग
तःयतअसौ किंवद्धः हतोवेतिप्रश्नेयदिमूलेक्रूरग्रहस्तदानहतोनवद्धः कुशलीतिवक्त

यंयदि क्रूरग्रहः सप्तमे वाष्टमे वेति तदा वद्धो हतो मृतो [illegible] इति वोच्यं॥ यदि क्रूरः मूर्तौ च पुनः सप्तमेपि उभयस्थाने भवति तदसौ पुरुषो वद्धो हतो वेति वाच्यं॥ यदा क्रूरो लग्ने सप्तम उभयस्थाने भवति तदोच्यते॥ पूर्वे वद्धः हतः प्रहारो लग्नः परस्तु च्यते॥ इह प्रश्ने एवं क्रूरविषये क्रूरग्रहसंवंधिव्याख्यानं दीप्तत्वादेवेपिहतमिति न ग्रहवितत्वान्न इति भावः॥ ६७॥ अथ पथिकस्य गमागमो गमनागमनपृच्छायां यदि सौम्यग्रहः चतुर्थे वा दशमे स्थाने भवेत्॥ तदागमनं भविष्यतीति वा मनं न भवति। यदि तत्रैव चतुर्थे वा दशमे स्थाने क्रूरग्रहो भवेत्। तदागमनं भविष्यतीति वा वाच्यं॥ यदा खेटः क्रूरः शुभो वा केन्द्रतः लग्नचतुर्थदशमस्थानात् द्वितीये पंचमे अष्टमे एकादशे स्थाने अभ्येति प्राप्नोति। तदा वेलायां तदागमनं तस्य पथिकस्यागमो वाच्यः॥ अपि यदा केन्द्रात् ग्रहो व्ययमतिक्रम्य आगमनशीलं ग्रहं द्वाभ्यां श्रीकलतईं भूयात्॥ यदा केन्द्रात् ग्रहो व्ययमतिक्रमात् पथिकः समायाति॥ यस्यां घटिकायां धर्मभवने गच्छति॥ तस्यां घटिकायां देशांतरात् पथिकः समायाति॥

वाक्यं २

17

८

यदुक्तं। प्रयातिसहजस्थानमौ यस्यांशुभग्रहः॥ आयातिपथिकस्तस्यामेवनाडां गृहं प्रति॥
सहजं प्रथमं केंद्रं तृतीयं तथागमनमायेचतुर्थमिवलोकनीयं यदि तत्र शुभग्रहो भवति प्रति
चि क्षितिवा केंद्रचतुष्टयात्॥ द्वितीये पणफरास्थेयदि जिगमिषुर्वर्तते गमने वाच्यो॥ दिनसं=
ख्याचग्रहागमनप्रमाणतो वाच्यं केंद्रधनस्थानसंघो समागच्छति सर्वग्रहाणां आगवलक्रय
हं दृष्ट्वा वक्तव्यो। लग्नपतिचविशेषतः॥ ८२॥ यदि चंद्रः केंद्र तृतीयस्थानं आयियासुः आगमन
शीलो भवति तदा पथिकस्यागमनं विशेषतो ब्रूते कथयति सप्तमकेंद्रगं चंद्रमुक्ता चेपुनः यदि
म मार्गाधिपः सप्तराश्यधिपः राश्यधिपः राशय दुर्गे तु परभागो व्यवस्थितो भवति। तदा मार्गगो
ज्ञेयः चरराशौ तिविशेषः चरलग्ने तस्यैव नवांशके चरे सति यदि चतुर्थस्थाने चंद्रमा दितो
भवति तदा वक्तव्यं संप्राप्तं प्रवासिनं स्ववेश्मनि समायातं ब्रूते। तदुक्तं। दूरगतस्यागमनं सुत
धनसहजस्थितेग्रहैर्लग्नात्॥ सौम्यैर्नष्टप्राप्तिलाभागमनं गुरुसितौ भ्यां च॥ अष्टमस्थ

९

लाभादिकं भवेत्। तथा तु रवेर्यदि प्रहारे शुभग्रहयोगप्रभावतः शोभनग्रहप्रभावात्। कुशलं स्या
त्। अथ क्रयाणककार्यविज्ञानमित्येकोनत्रिंशद्द्वारमाह॥ लग्नपतिः केन्द्रग्रहको गानयः आयः
स्यैकादशस्थानपतिः त्रिकेन्द्रग्रहको गानयः॥ अहमिदं वस्तु गृह्णामि [illegible] मीति ईदृशप्रश्ने सति लि
वक्तव्यं॥८२॥ अमुकं वस्तु समर्घं वा महर्घं वा भविष्यतीति निमे कथयेति पृच्छायां सत्यां येन लग्ने शु रवेरेव ४
भसबलं खे पश्यति प्रतिपद्यते असौ खरखेटः तस्य लग्नस्य यावन्तो मासा सौम्यतां सौम्यभावं प्र
तिपद्यते तावतो मासान् क्रयाणकं समर्घं ब्रुवंते॥ अथासौ ग्रहः कियद्भिर्वासरैः शुभः
स्यात्॥ इति चिंत्यः विचारणीयः॥ अथ शुभग्रहः विनिश्चितं यथा स्यात्तथा कियद्भिर्वासरैर्वि
लग्नस्य सौम्यभावं विलग्नत्वं विधास्यती [illegible] चिंत्यः रविसमे मासाः इति चंद्रदिवसैर्मासाः सं
याः। विशेषग्रहाणां यथाकालमेव दिनैर्दिनानि मासैर्मासा इति संज्ञेयं॥ अधिष्ठातुर्बलं ज्ञे
यं लग्ने स्वामिविवर्जिते॥ बलहीने त्वधिष्ठातुः प्राहुः स्वामिबले बलं॥ क्रयाणकानां पृच्छेयं
सौम्याः ज्ञेया महात्मभिः॥८३॥ स्वामिवर्जिते स्वामिदृष्टिरहिते लग्ने सति अधिष्ठातुः वस्तुनो

१०

योधिष्ठानाऽप्यधिदेवताभवति तस्यबलं ज्ञेयं तुपुनः अधिष्ठानरविलहीने सतिलग्नस्वामिबले बलं
आहुः अत्र तु केषां वस्तूनां कः स्वामीति निर्णीतं तु ग्रंथांतरश्लोकानाह॥ रसानां प्रभवः सोमः सस्यानां
च बृहस्पतिः॥ अधातावविधातानां च भूतानां भार्गवः स्मृतः॥ कंशकोद्रवमाषाणां तिलानां लवणस्य
च॥ सर्वेषां कृष्णवस्तूनां प्रभुरेव शनैश्चरः॥ स्वर्णादिः पीत धान्यस्य -- गोधूमसर्षिषां॥ शाल्ये
लूणां च सर्वेषां प्रभुरेव बृहस्पतिः॥ शुक्रस्तु सर्वसस्यानां द्विदलानां बुधः स्मृतः॥ स्नेहानां च रसा
नां गंधादीनां दिवाकरः॥ कोशधान्यस्य सर्वस्य प्रवालानां च मंगलः॥ इत्येते च ग्रहाः सर्वस्वामि
नः सर्ववस्तुनः॥ महात्म्यनिइयं क्रयाणकानां पृछा सोम्याः शुभग्रहा ये ताज्ञेयाः सौम्यः शुभग्र
हः केंद्रे भवति शुभैर्युक्तं तु मद्लग्नं सबलं तदेव ब्रुते तु पुनः अन्यथा अलं लग्नं वदंतीत्यर्थः॥ १६॥ मबलं४
अथ नौमतिबंधनत्रय मितित्रिं शद्वारमाह॥ धरणाकुब इंयेनयोगेन मं त्युयोगेन जलेवपनजे
लवस्तुले स्वनंत थापण्य व्यवहारतो व्यवहारे लाभो भवेत्॥ यदि लग्नपति र्वक्षमस्थानतः सप्त
मस्थाने भवेत्॥ तदा जलमध्ये वस्तु वायानीकां कथयति यदि मृत्युपतिः नवमगः नवमस्थाने

११

पैर्ग्रहैर्युक्तः कार्यः सता स्कालिकपृच्छालग्नेन वभागी कृत वर्तमानमूर्धां गृही त्वा तत्रस्थ नवांशक २
रिपुसंस्थे भवति तदा नागतं वस्तु व्यवहारे लाभो न भवेत् ॥ ९२ ॥ लाभोदयो दिनद्वये कर्त्रिंशद्वारमा
ह ॥ इह अतीतदिनं फलम् अग्रे सलग्ननवांशकगता न ग्रहा विचार्य तदनुसारेण अतीतदिन फलं वा
च्यं ॥ तत्र नवांशकानयनफलं आफले गुरूपदेशो वीजं यथा पुत्र पृच्छालग्ने वीजं पुरुषग्रहाणां सकले लद
स्त्या पुत्र एव वाच्यः ॥ अन्यथा गुरूपदेशं विना अयुक्त एव अतीत दिनस्य नवांशेन आगत पर्यंतमा
नायेद्वचनानां तद्दिनलग्ने विन्यस्य कुंडलिकायां विलिखेदित्यर्थः ॥ गणकै दैवज्ञैरतीतस्य दि
वसस्य अतिक्रांतं नवनिधाम धान्यादिकं ज्ञानमित्यादिरूपमवधार्य प्रष्टुर्वाच्यं ॥ ९५ ॥ अथपु
लं मासस्य लग्नपादिति । द्वात्रिंशद्वारमाह ॥ पृच्छालग्ने लग्नपतिर्यस्मिन् नवांशो भवति ॥ तमंशमा
लोक्य लग्नाधिपतिर्लग्ननवांशनाथयोः दृष्ट्युक्तसुहृत्वमुक्तमनं लोक्य बलावलं विचार्य तत्का
र्यमादेश्यं ॥ १०० ॥ अत्र तनुधनादिस्थानेषु लग्नाधिपतिर्वा भवति पूर्वोक्तयोगे दृग्युते मित्रत्वे त
न्वादिस्थानेषु सुंदरता स्यात् ॥ कियद्याव सुंदरता भवतीत्याह यावल्लग्नाधिपते रंशकला अंव:
स्थिति कालः ॥ अंशाधिपते स्वावधि काल इति सकालश्च तावत्कालं शेष[illegible] धनादिभावांशाक

१२

नाथेसहवासः॥ असौ अंशककालभृति लग्नाधिपतिरंशाधिपतिश्च तावद्धनादिस्थानेषु सं-
चार्यः॥ परस्परं चालनीयः॥ यावत्तेन तादिव्यपर्यंताभावाः पूर्णा भवंति यत्रस्थानेन लग्नाधिपांशाः
३२ धिपं[illegible]योर्दृष्टिः संपूर्णास्युः केवलं मित्रत्वं वा स्यात्तदा तस्य स्थानस्य संख्या यामास संख्या वर्न-
था॥ अथ इक्षाणादिफलं सर्वमिति त्रयस्त्रिंशत्तद्वारमाह॥ यत्र इक्षाणयो लग्नं भवति। तस्मा-
द्रुक्षाणलग्नात् विंशतितमे इक्षाणेण यदि लग्नाधिपतिर्भवति तदा रोगिणः पृछायां तन्मृतिमर-
णं वाच्यं॥ एवं पूर्वोक्तप्रकारेण द्वादशतन्वादिभावेषु केवले केवले ईक्षाणे रेवचिनिश्चयं ब्रूया-
त्। अन्येषु पृछार्थे विचारणीय इत्यर्थः॥ यस्मिन्स्यात्तदा ग्रहभावानपेक्षेण शुभं फलं आस्वा-
यमित्यर्थः॥ ५॥ अथ दोषज्ञानं महाद्भुतमिति चतुस्त्रिंशद्वारमाह॥ आद्यामूर्तेशिषखेचरा
यायास्ते व्यये द्वादशे अस्ते सप्तमे भवंति अर्केस्मिन्नपालस्य दोषवं इंद्राकाशदेव्याः मंगले शाकि-
न्याः बुधे अष्टविदेवतायाः जीवदेवदोषः शुक्रे अर्बुदेव्याः शनौ आदोषः राहौ षंयंतरदोष

22

तान्दिशेषं मिहरादयः आचार्याः॥ अथ दिनचर्यानृपादीनामिति पंचत्रिंशद्वारमाह॥ कश्चिन्नृपः
पृच्छति अतिअद्यदिनमध्ये मम किं शोभनमशोभनं वा भविष्यतीति प्रश्ने सति उदयास्तयोः उद
ये लग्ने अस्ते स्तमने चंद्रः शुभः पूर्णः शुभग्रहयुक्तो वा शुभदृष्टः स्यात्तदा सकलो दिवासरः श्रेया
नुकल्याणमयः अवगंतव्यः॥ यदि अष्टमस्थाने स्वगृहे स्वक्षेत्रे गते राहौ च पुनः कुजे अन्य
स्मिन्नपि क्रूरे खेचरे सति च पुनः अत्रैवाष्टमस्थाने दिनचंद्रे सति तदा वाच्यं॥ तस्मिन्दिने अ
स्मिनाम्नवेद्भनवघोभविष्यतीति॥ ५९॥ अथ गर्भेस्मिन्किं भविष्यतीति षट्त्रिंशद्वारमाह॥
गर्भवती स्त्री यदा पितृगृहस्था सती पृच्छति तदा तस्याः पितृगृहे यन्नाम भवति तदक्षराः
णि ग्राह्याणि स्वकीं च पुनः यदि भर्तृगृहे गच्छति तदा भर्तुर्नाम्नो यन्नाम भवति तदक्षरा
णि ग्राह्याणि॥ सुद्यारभ्य वदिद्य वस्थिता नतिथीनवत्वा सुदि प्रतिपदं तिथिमारभ्य यदि
अमावास्यापर्यंतं मध्ये वर्तमान अद्य दिने यावद्व्यवस्थितास्तिथयस्तानतिथ्यौकेन च पुनः

यादि२

णीगर्भ पंचमं पंचमस्थानं न पश्यति क्रूरो ग्रहः पश्यति। अथवा पंचमस्थाने क्रूरो ग्रहो भवति।
तदा अस्य गर्भस्य च्युतिः पतनं भविष्यति इति वाच्यं॥ चंद्रो लग्नपतिर्वापि यदि केंद्रे शुभान्वि
तः॥ किंवदंती तदा सत्यास्या दसत्या विपर्यये॥ लग्नस्थं चंद्रं जं क्रूरो वा यदि पश्यति। धनल चंद्रः २
मो भवत्याशु किंत्वनर्थो विपश्चितः पश्चात्॥ ४०॥ अथ गुर्विण्याः प्रसवाय देति। यदि ग्रहोऽधि
पः क्रूरोक्ताद्यभावेन अविनष्टः सन् गर्भं पश्यति॥ तस्मिन्नेव समये अस्यासन्न तयात त्का
ले प्रसवो वाच्यः॥ अन्यथा नेति। पंचमस्थाने शुभग्रहदृष्टिं विना न फलति॥ तत्र पदा लग्न
पते पितृस्थानाधिपतिः नात्र संयोगः पितुश्चाविनष्टे मातृस्थाने व्यभिचारे सवंतिमे अ
न्यजातोयमिति वाच्यं॥ अथापत्य युग्म प्रसवइति गुणाविग्रहयुग्मे सतस्थानेस्थाने
संपूर्णदृष्ट्या दृष्टे न युग्मस्य प्रसवो वाच्यः॥ अथ येमासा गर्भसंभवा इति दशमे का दशाद
दशास्थाने शुभक्रूरस्तदा पंचमस्थानतो गणनीयः॥ तावंतो मासा वाच्याः॥ अथ धन्ता

मुनीन्सप्तध्रुवान्दत्वा कुर्वीत पञ्चाक्षरी कः तिर्य्यक् रेखे क्रमेलयित्वा ध्रुवांकान् स्वक्षिप्यवन्हि
भिर्भागं दत्वा यच्छेषं क शेष स्त दपुत्रो वाच्यः ॥ द्वाभ्यां सुता खेन भून्ये नपुंसकमित्यर्थः ॥ अ
न्यच्चोक्तं ॥ पुंवर्गे लग्नगते पुंग्रह दृष्टे बलान्विते पुरुषः ॥ स्त्रीवर्गे लग्नगते स्त्रीग्रह दृष्टे बलान्वि
ते कन्या ॥ अन्यच्च भसुत प्रश्ने सुतस्वामी लग्नस्वामी वसंस्थितः ॥ नरराशौ भवेन्नरस्य स्त्रीराशौ
कन्यकोच्यते ॥ ॥ इति श्री भुवनदीपक टीका समाप्ता ॥ अन्यतः ॥ वर्षप्रश्ने द्ग्रामभव
नं विचार्यं ॥ अन्यच्च यदा सप्तमगो सिताकौ सुखे सप्तमे वापि तथा विलग्नात् ॥ द्वितीय दृश्चि
कागतौ न तथा वा वर्षा सुदृष्टिं मुनयो वदंति ॥ कुंभ कुंभ मगमीन कर्कटा वृष वृश्चिक तौलि
संज्ञकाः सप्त जलराशयः ॥ एते शेषा जल वर्जिताः ॥ पंच सौम्या जलराशिस्थास्तत्तीय ध
नकेंद्रगाः सितेपक्षे ॥ चंद्रे वाप्युदयगते जलराशिस्थे वदेद्वर्षा ॥ शुभमस्तु शाके १६९ मार्ग शुद

भुवनदीपक